## पाघ्राध्माधेट्दृशः शः । (१३७/२८९९)

[1]पादिभ्यो धातुभ्यः [2]उपसर्गे उपपदे शप्रत्ययो भवति। उत्पिबः। विपिबः। उज्जिघ्रः। विजिघ्रः। उद्धमः। विधमः। उद्धयः। विधयः। उत्पश्यः। विपश्यः। उपसर्गे इति केचिन् नानुवर्तयन्ति। पश्यति इति पश्य (छां. ७.२८.२)।

[२२३] [3]जिघ्रतेः सञ्ज्ञायां प्रतिषेधो वक्तव्यः। (म. भा. २. ९२)

व्याघ्रः॥

## अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च । (१३८/२९००)

अनुपसर्गेभ्यो लिम्पादिभ्यः[4] शप्रत्ययो भवति। लिम्पति इति लिम्पः। विन्दति इति विन्दः। धारयति इति धारयः। पारयति इति पारयः। वेदयति इति वेदयः। उदेजयति इति उदेजयः। चेतयति इति चेतयः। सातिः सौत्रो धातुः। सातयः। साहयः। अनुपसर्गात् इति किम्। प्रलिपः।

[२२४] नौ लिम्पेरिति वक्तव्यम्। (म. भा. २.९२)

निलिम्पा [5]नाम देवाः।

[२२५] गवादिषु विन्देः सञ्ज्ञायाम्। (म. भा. २.९२)

गोविन्दः[6]। अरविन्दः॥

## ददातिदधात्योर्विभाषा । (१३९/२९०१)

दाञो धाञश्च विभाषा शप्रत्ययो भवति। [7]णस्यापवादः। ददः, [8]दायः। दधः, धायः। अनुपसर्गात् इत्येव, प्रदः, [9]प्रधः॥

## ज्वलितिकसन्तेभ्यो णः । (१४०/२९०२)

इतिशब्दः [10]आद्यर्थः। 'ज्वल दीप्तौ' (धा. पा. ८०५) इत्येवमादिभ्यो धातुभ्यः 'कस गतौ' (धा. पा. ८६१) इत्येवम[11]न्तेभ्यो विभाषा णप्रत्ययो भवति। अचोऽपवादः। ज्वालः, ज्वलः। चालः, चलः। अनुपसर्गात् इत्येव, प्रज्वलः।

[२२६] तनोतेर्णस्योपसङ्ख्यानं कर्तव्यम्। (म. भा. २.९२)

अवतनोति इति अवतानः॥

---

1. पा घ्रा ध्मा धेट् दृश इत्येतेभ्यः ब. क. 2. उपसर्गे नास्ति फ. 3. जिघ्रातेः ब, जिघ्रः ङ. 4. धातुभ्यः इत्यधिकम् क. 5. नाम नास्ति ग. 6. कुरुविन्दः इत्यधिकम् ग. फ. 7. ण्यस्य क. फ. 8. दयः फ. 9. प्रधा ब. 10. आद्यर्थे वर्तते ब. फ. 11. पर्यन्तेभ्यः ब.